National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 326-328
© 2026 NJHSR
www.sanskritarticle.com

**दीप्तिरेखा मिश्र**
शोधच्छात्रा,
सदाशिवपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,

**Correspondence:**
**दीप्तिरेखा मिश्र**
शोधच्छात्रा,
सदाशिवपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,

# सिंहलविजयनाटके नाटकलक्षणसमन्वयः

**दीप्तिरेखा मिश्र**

नाटकं ख्यातवृत्तं स्यादिति लक्षणानुसारं नाटकस्योपाख्यानं सर्वदा रामायणमहाभारतपुराणादि-प्रसिद्धकथावस्तु स्यात् इति साहित्यदर्पणाकारः विश्वनाथः व्याख्याति। तथैव श्रीसुदर्शनपाठिशर्म-विरचितसिंहलविजयनाटकस्य इतिवृत्तम् उत्कलस्य इतिहासः वर्त्तते। ख्यातवृत्तं नाम ऐतिहासिकेतिवृत्तमपि स्वीक्रियते, तेन चास्य नाटकस्योपजीव्यमुत्कलप्रदेशस्य ऐतिह्यमिति। तदर्थं नाटकस्य यल्लक्षणं वर्तते तदवश्यमत्रोपगच्छतीति। पुनश्च पञ्चसन्धिसमन्वितम् अर्थात् नाटके मुख-प्रतिमुख-गर्भ-विमर्श-निर्वहणम् इति पञ्च सन्धयः भवेयुः। अत्रापि सिंहलविजयनाटके पञ्च सन्धयः क्रमशः भवन्त्येव । सिंहलविजयनाटकस्य चतुर्थाङ्के भविष्यत्कथनं वर्त्तते इति हेतोः विमर्शः अस्ति। यत्र मुख्यफलोपायः उद्भिन्नो गर्भतोऽधिकः शापाद्यैः सान्तरायश्च स विमर्शः इति स्मृतः इति लक्षणानुसारं नाटकस्य चतुर्थाङ्के विमर्शः दृश्यते। किञ्च बहुत्र मुखप्रतिमुखादिकं वर्त्तते । नाटकस्य पञ्चमाङ्कः निर्वहणं भवति । यतो हि बीजवन्तो मुख्याद्यर्था विप्रकीर्णा यतायथम् इति लक्षणानुसारं पञ्चमाङ्के यदा दीर्घवेणी भूमौ पतितः तदा नाटकस्य बीजमुद्घाटितमासीत् तदर्थमेतद् निर्वहणमिति नाम्ना परिख्यातमस्ति। नाटकस्य विषयवस्तुनि विलास-समृद्धि-धैर्य-गाम्भीर्य-ऐश्वर्यप्रभृतिभिः परिपूर्णानि स्युः। यथा उद्योतकेशरिणः ऐश्वर्यं सम्पूर्णेऽपि उत्कले प्रशस्तिः वर्त्तते ।। नाटकेऽस्मिन् विचित्राकलावत्योः विलासः, विदुषकस्य सिद्धवटोः विलासः अपि परिलक्ष्यते। किञ्च दीर्घवेण्याः गाम्भीर्यं धैर्यं च दरीदृश्यते नाटकेऽस्मिन्। तथैव सिंहलविजयनाटके बहुत्र ऐश्वर्यगाम्भीर्यधैर्यादयः गुणाः परिपूर्णाः सन्ति । तदन्ते नदीपर्वतफलपुष्पवनराजिभिः नाटकमिदं सौन्दर्यस्य संवर्धकं भवतीति । यथा-

**वनं जलनिधेस्तीरे प्रसन्नाः सर्वतो दिशः**
**आम्रादिभिर्विशोभन्ते केदाराः शस्यपूरिताः ।।**[1]

किञ्च उत्कलस्य सैनिकेषु राजसु सेनानेत्र्यां च ऋध्यादिगुणाः सन्ति । यतो हि एते कालिङ्गाः सर्वदा प्रचोदिताः सन्ति। तृतीयाङ्कस्य प्रथमदृश्ये सेनाध्यक्षः उत्कलकेशरिणः प्रधानामात्यः सैनिकान् प्रचोदयति यथा- हे सैनिकाः भवन्तः सर्वेऽपि युद्धकलायां निपुणाः सन्ति तदर्थं भवन्तः सर्वे साहसिकाः सन्ति । उद्योतकेशरिणः सौभाग्यात् भवादृशाः सैनिकाः लब्धाः । यथा-

**स्वतः साहसिकाः यूयं कलाभिर्विशदीकृताः**
**भाग्यं भाग्यवतां नेता श्रीमानुद्योतकेशरी ।।**[2]

एतत् सर्वं नाटकस्य ऋद्ध्यादिगुणं प्रदर्शयति। चतुर्थाङ्कस्य प्रथमदृश्ये दीर्घवेण्याः धैर्यं समीक्षते । यदा पद्मा समागत्य दीर्घवेणी भर्त्तृदारिके इति सम्बोधयति तदा दीर्घवेणी स्वकीयायाः ऋद्ध्यादिगुणं प्रदर्शयति । वदति सा – किं वा रूपेण गुणैर्वा। वैदिकानां बौद्धैः परिणयनं न सम्भाव्यते, परन्तु स मम प्रियसख्याः कलावत्याः प्रियतमः सम्माननीय एव मम। पुनश्च चतुर्थाङ्कस्य द्वितीयदृश्ये कश्चन माधववर्माणं वदति भवतः कन्या उद्योतकेशरिणे दातव्या इति। तदा माधववर्मा गाम्भीर्येण वदति यत् असम्भवः । कविभाषायामित्थमुच्यते-

**इदानीमेव गच्छामि यस्यारेर्नाशकारणात्**
**स्वयमेव स्वतनयां तस्मै वा कथमर्पये ।।**[3]

न केवलं सिंहलविजयनाटके पुरुषाः वीराः अपि तु नाटकेऽस्मिन् नार्यः अपि वीराध्यक्षाः सन्ति। चतुर्थाङ्कस्य चतुर्थदृश्ये विचित्रा उत्कलीयसैनिकान् प्रचोद्य कथयति हे कालिङ्गवीराः। प्रकाशयत सम्प्रति यथेष्ठं स्वभुजेषु सञ्चितानि वीर्याणि न खलु युष्माकं प्रतिज्ञातवतां सिंहलविजयः किञ्चित्करो भवति। न हि केशरिभिः मृगयूथजयदुष्करो भवति। वीराः। स्थापयत स्वयशःपताकां सिंहलेषु। योधयत उत्कलीयानामेव सदृशं युद्धं, वदत वीराः। वर्द्धन्तां वर्द्धन्तां कालिङ्गाः श्रीमुद्योतदेवाः। एवं प्रकारेण नाटकलक्षणे यथा धैर्यादिगुणाः अपेक्षिताः सन्ति तथैव सिंहलविजयनाटकेऽस्मिन् धैर्यादिगुणाः वरीवृत्यन्ते ।

नाटके सुखदुःखयोः क्रमशः समुद्भूतिः स्यात्। अर्थात् दुःखादनन्तरं सुखं सुखादनन्तरं दुःखं क्रमशः विपरिवर्तेत । तथैव सिंहलविजयनाटके आदौ दीर्घवेणी स्वसख्या पित्रा च सह सानन्दमटति स्म परन्तु युद्धकाले तस्य मरणेन सम्पूर्णमिदं युद्धक्षेत्रं शोकाकुलमासीत् इत्येवं क्रमेण नाटकस्य लक्षणमुपयुज्यते । दीर्घवेणी क्रन्दित्वा वदति-

महात्मन्। अङ्गीकुरुष्व। त्रिभुवनमहनीयरूपगुणां प्रियसखी कालेकेलिम्। पितृव्य कृतार्थय दीर्घवेणीम्। किञ्च प्रियसखि। महाप्रयाणात् पूर्वं प्रियसखीदर्शनेन परमानन्दस्य एव अवसरः इति दीर्घवेणी पञ्चमदृश्ये वदति। पुनश्चात्र दीर्घवेणी क्रन्दित्वा वदति प्रियसखि विचित्रे। एवं विज्ञापयितव्यः स भवान् उत्कलकेशरी जन्मान्तरेऽपि दीर्घवेणी तमेव युद्धेषु प्रतिपक्षत्वेन लभेत । एषा पुनः सिंहलान् अस्वकतन्त्रानेव पश्यन्ती प्राणान् त्यजति इत्येवं प्रकारेण दुःखस्य छाया प्रचलत्यत्र । परन्तु इयं दीर्घवेणी ससुखं चतुर्थाङ्कस्य चतुर्थदृश्ये वदति-

अयि सिंहलानां वीरचूडामणयः। न खलु पराजेतव्यं भवद्भिः, न हि पराजीयेत सिंहलीयः, कुत्र वा क्षुद्राणां कालिङ्गानां निपुणता, या हि भवतोऽपि निश्चेष्टीकुर्यात् । इदानीमेव प्रतिहन्यन्ते कालिङ्गापसदाः। अद्यैव विजेतव्या तेषां परिचालिका विचित्रा, अद्य हि सिंहलेन्द्रनन्दिनी न निर्जित्य विचित्रां शिवरं न प्रत्यावर्त्तेत, यथेष्ठं भवद्भिर्हन्तव्याः कालिङ्गाः, पुनर्वदत वीराः । वर्द्धन्तां सिंहलाः, वर्द्धन्तां सिंहलानाम् अधीश्वराः एवं प्रकारेण दीर्घवेणी सुखपूर्णवार्त्तां प्रयच्छति । अतः नाटकस्य यल्लक्षणं सुखदुःखसमुद्भूतिः इति अत्र युज्यते एव।

नाटके नैके रसाः क्रमशः आयान्ति तथैव अस्मिन् नाटकेऽपि क्रमशः करुणशृङ्गारादयः रसाः समायान्ति। नाटके अङ्काः पञ्चतः दशमध्ये भवेत्। तथैव सिंहलविजयनाटके पञ्च अङ्काः सन्ति। अपि च प्रत्येकस्मिन् अङ्के चत्वारः त्रयः पञ्च वा उपदृश्यानि सन्ति। येन च नाटकमिदं समाकर्षकं भवति। नाटकस्य नायकः विख्यातवंशे स्यात् अत्रापि नायकः उद्योतः प्रख्यातवंशे राजा आसीत् । नायकः नाटके धीरोदात्तः प्रतापी च भवेत् तथैवात्रापि नायकः राजा उद्योतकेशरी महान् प्रतापी धीरोदात्तश्च भवति । नायकः दिव्यादिव्यसम्पन्नः स्यात् इति नाटकस्य लक्षणे वर्त्तते। तथैव सिंहलविजयनाटके नायकः उत्कलाधिपः उद्योककेशरी अदिव्यसम्पन्नः सन् सकलगुणविभूषितः भवति । वस्तुतः नायकस्य भेदलक्षणं यथा-

**धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च**
**धीरप्रशान्तः इत्ययमुक्तः प्रथमश्चतुर्भेदः ।।**[4]

एतत् नायकभेदस्य लक्षणं वर्त्तते। तत्र नायकः धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरप्रशान्तः इति चतुर्भेदः वर्त्तते। धीरोदात्तस्य लक्षणं यथा-

**अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः**
**स्थेयान्निगूढमानो धीरोदात्तो द्रढव्रतः कथितः ।।**[5]

अविकत्थन अर्थात् आत्मप्रशंसारहितः, क्षमावान् अर्थात् क्षमादानशीलः, अतिगम्भीरः, महासत्त्व अर्थात् सुखदुः खसमान-चिन्तकः, स्थेयान् नाम स्थिरस्वभाववान्, निगूढमान् नाम स्वाभिमानी, दृढव्रत नाम सत्यप्रतिज्ञः एतादृशगुणवान् नायकः धीरोदात्तः भवति। उदाहरणं यथा रामः युद्धिष्ठारादयः नायकाः। धीरोद्धतस्य लक्षणं यथा-

**मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः**
**आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः ।।**[6]

अर्थात् मायापटुः अहंकारदर्पभूयिष्ठः, प्रचण्डस्वरूपः नायकः धीरोद्धतः भवति, यथा भीमसेनादिः। धीरललितस्य लक्षणं यथा-

**निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात् ।**[7]

अर्थात् यः सर्वदा चिन्तामुक्तजनः, कोमलस्वभावः, कलापरः, अर्हनिशमहोरात्रं नृत्यसंगीतपरः नायकः धीरललितः भवति। उदाहरणं यथा- वत्सराज उदयनः । धीरप्रशान्तस्य लक्षणं यथा-

**सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात् ।**[8]

अर्थात् यस्मिन् नायके त्यागादिगुणः अत्यधिकभावेन तिष्ठति, किञ्च यः ब्राह्मणादिवर्गे जातः सः धीरप्रशान्तः भवति। उदाहरणं यथा मालतीमाधवे माधवः। एतत् सर्वं विचिन्त्य एतद् ज्ञायते उद्योतकेशरी धीरोदात्तः भवति। यतो हि उद्योतकेशरी गुणग्राही वर्त्तते। यद्यपि सिंहलीयाः तस्य शत्रवो वर्त्तन्ते, परन्तु सः सिंहलानां वीराणां शौर्यस्य प्रशंसां करोति। दीर्घवेण्याः पराक्रमप्रकर्षं श्रुत्वा सः सानन्दो भवति । भवति च समुद्यतः स्वयं युद्धं कर्तुं तया सह। राज्ञः औदार्यमपि यत्र तत्र दृग्गोचरीक्रियते। यथा आहतायां दीर्घवेण्याम्, सः तस्य पितरं चित्रकेयूरं मुक्तं करोति ।ससम्मानं च गत्वा तस्याः सविधे वक्ति- देवि। न भवादृश्यः स्वदेशस्य अस्वातन्त्र्यं द्रष्टुमर्हन्ति। स्वतन्त्राः सिंहलाः मुक्तः सभवान् सिंहलेन्द्रः इति। एतदेव नहि, यदा आहता मरणावस्थापन्ना दीर्घवेणी राजानं वक्ति- महाभागाः। न वा रक्ष्यते दीर्घवेण्या अनुरोधः। तदा राजा उद्योतः तां प्रति सम्मानं दर्शयन् वक्ति- किमेव राजेन्द्रनन्दिनि। आज्ञापय यथेष्टम् इति। अनेनैव प्रकारेण तस्य स्वसेनापतेः पुष्कराक्षस्यापि आलिङ्गनकरणे सङ्गोचो नहि दृश्यते। कुलीनता तु तस्य प्रख्यातैव उत्कलकेशरिणामन्वये तस्य जन्मास्ति। त्यागोऽपि तस्य चरमां काष्ठां स्पृशति। राजा उद्योतः स्वभावेन धार्मिको वर्त्तते । सः भगवतः आरार्तिक्यस्य दर्शनं करोति। तस्य वैदिकमतावलम्बिता प्रख्याता वर्त्तते । स्वयमेव दीर्घवेणी तं वक्ति यत् – उद्योतः वैदिकमतानुयायी वर्त्तते, अत एव तेन सह तस्या उद्वाह असम्भव इति । सङ्क्षेपेण राजा उद्योतः त्यागी, कृती, कुलीनः,

वदान्यः, वारीग्रगण्यः, शृङ्गारप्रियः, एकपत्नीत्वसिद्धान्तानुयायी च वर्त्तते। अयमेवास्य नाटकस्य प्रधानफलभोक्ता वर्त्तते। एतत्सर्वमनुसृत्य ज्ञायते यत् राजा धीरोदात्तनायकः वर्त्तते इति निश्चप्रचम्। नायिकाभेददृष्ट्वा यदि चिन्तयामः तर्हि सिंहलविजयनाटकस्य नायिका कलावती स्वीया नायिका भवति। यतो हि स्वीयानायिकायाः लक्षणं यथा-

**लज्जापर्याप्तप्रसाधनानि परभर्त्तृनिष्पिपासानि**
**अविनयदुर्मेधानि धन्यानां गृहे कलत्राणि ।।**[9]

अर्थात् विनम्रता, सरलता, आर्जवसम्पन्ना, सदाचारिणी, गृहकर्मपरा, पतिव्रता, विश्वासपात्री स्वीयानायिकायाः लक्षणमस्ति । एतस्मिन् लक्षणे कलावती अन्तर्भवति। पुनश्च स्वीयानायिकासु मुग्धानायिकायाम् इयमन्तर्भवति। यतो हि मुग्धानायिकायाः लक्षणं यथा-

**प्रथमावतीर्णयौवनमदनविकारा रतौ वामा**
**कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ।।**[10]

नाटके अङ्गीरसः शृङ्गारः अथवा वीरः स्यात्। तथैवात्र सिंहलविजयनाटके अङ्गीरसः वीररसः भवति। यतो हि नाटकस्यान्तेऽपि दीर्घवेण्याः वीरस्वभावः वर्त्तते तदर्थमत्र वीररसस्य प्रगतिः इति नास्ति सन्देहस्यावकासः । नाटके एकः प्रधानरसः सन् अपरे रसाः गौणाः भवन्ति । तथैवास्मिन् सिंहलविजयनाटके वीररसः प्रधानरसः भूत्वा अन्ये करुणादयः रसाः गौणाः भवन्तीति । नाटके प्रायतः चत्वारि पञ्च वा पात्राणि प्रत्येकस्मिन् अङ्के भवन्तीति नाटकलक्षणे वर्त्तते तथैवात्रापि सिंहलविजयनाटके सर्वेष्वपि अङ्केषु चतुरधिकानि पात्राणि सन्तीति । यथाप्रथमाङ्के पुष्कराक्षः, विचित्रा, हरिचन्दनः, कलावती, तरला, राजा उद्योतः इति पञ्च षट्पात्राणामभिनयः वर्त्तते । नाटकस्य नामकरणं एतादृशं कर्त्तव्यं येन नाटकस्य भित्तिः प्रकाशमाना स्यात् । तथैव अस्य नाटकस्य नामकरणं सिंहलविजयनाटकम् इति याथार्थ्यं याति। वस्तुतः यद्यपि उद्योतकेशरी उत्कलनायकः आन्ध्रचोलादीन् देशान् पराजयत तथापि सिंहलविजयनाटकस्य राजकुमारी दीर्घवेणी बह्वेश्वर्यसम्पन्नासीत्। तस्याः पराजयनेनैव नाटकमिदं समाकर्षकं भवति तदर्थं सिंहलदेशस्य विजयम् इति सिंहलविजयम् इति नाटकस्य नामकरणभूत्। नाटकस्याकृतिः गोपुच्छवत् भवेदिति नाटकीयलक्षणं तथैव एतदपि नाटकं गोपुच्छतुल्यमिति वर्त्तते इत्येवं प्रकारेण साहित्यदर्पणकारस्य विश्वनाथस्य लक्षणस्योपरि अस्य सिंहलविजयनाटकस्य समन्वयः करणेनेदं ज्ञायते यत् नाटकमिदं सुस्पष्टं स्वाकृतिकं लक्षणसमन्वितमिति दिक् ।

**पादटिप्पण्यः-**

1.सा.द.तृ.प.पृ.सं-58
2.सा.द.तृ.प.पृ.सं-58
3.सा.द.पृ.सं-59
4.सा.द.तृ.प.पृ.सं-325
5.सा.द.तृ.प.पृ.सं-325
6.सा.द.तृ.प.पृ.सं-327
7.सा.द.तृ.प.पृ.सं-372
8.सा.द.तृ.प.पृ.सं-372
9.सा.द.तृ.प.पृ.सं-380
10.सा.द.तृ.प.पृ.सं-390